# श्री लिङ्गाष्टकम्

śrī liṅgāṣṭakam

ब्रह्म मुरारि सुरार्चित लिङ्गम् निर्मल भासित शोभित लिङ्गम् ।

जन्मज दुःख विनाशक लिङ्गम् तत् प्रणमामि सदाशिव लिङ्गम् ॥ १ ॥

brahma murāri surārcita liṅgam nirmala bhāsita śobhita liṅgam |
janmaja duḥkha vināśaka liṅgam tat praṇamāmi sadāśiva liṅgam || 1||

देवमुनि प्रवरार्चित लिङ्गम् कामदहन करुणाकर लिङ्गम् ।

रावण दर्प विनाशन लिङ्गम् तत् प्रणमामि सदाशिव लिङ्गम् ॥ २ ॥

devamuni pravarārcita liṅgam kāmadahana karuṇākara liṅgam |
rāvaṇa darpa vināśana liṅgam tat praṇamāmi sadāśiva liṅgam || 2||

सर्व सुगन्धि सुलेपित लिङ्गम् बुद्धि विवर्धन कारण लिङ्गम् ।

सिद्ध सुरासुर वन्दित लिङ्गम् तत् प्रणमामि सदाशिव लिङ्गम् ॥ ३ ॥

sarva sugandhi sulepita liṅgam buddhi vivardhana kāraṇa liṅgam |
siddha surāsura vandita liṅgam tat praṇamāmi sadāśiva liṅgam || 3||

कनक महामणि भूषित लिङ्गम् फनिपति वेष्टित शोभित लिङ्गम् ।

दक्श सुयज्ञ विनाशन लिङ्गम् तत् प्रणमामि सदाशिव लिङ्गम् ॥ ४ ॥

kanaka mahāmaṇi bhūṣita liṅgam phanipati veṣṭita śobhita liṅgam |
dakśa suyajña vināśana liṅgam tat praṇamāmi sadāśiva liṅgam || 4||

कुङ्कुम चन्दन लेपित लिङ्गम् पङ्कज हार सुशोभित लिङ्गम् ।

सञ्चित पाप विनाशन लिङ्गम् तत् प्रणमामि सदाशिव लिङ्गम् ॥ ५ ॥

kuṅkuma candana lepita liṅgam   paṅkaja hāra suśobhita liṅgam |
sañcita pāpa vināśana liṅgam   tat praṇamāmi sadāśiva liṅgam || 5||

देव गणार्चित सेवित लिङ्गम् भावैर्-भक्ति-भिरेव च लिङ्गम् ।

दिनकर कोटि प्रभाकर लिङ्गम् तत् प्रणमामि सदाशिव लिङ्गम् ॥ ६ ॥

deva gaṇārcita sevita liṅgam   bhāvair-bhakti-bhireva ca liṅgam |
dinakara koṭi prabhākara liṅgam   tat praṇamāmi sadāśiva liṅgam || 6||

अष्टदलोपरि वेष्टित लिङ्गम् सर्व समुद्भव कारण लिङ्गम् ।

अष्ट दरिद्र विनाशक लिङ्गम् तत् प्रणमामि सदाशिव लिङ्गम् ॥ ७ ॥

aṣṭadalopari veṣṭita liṅgam   sarva samudbhava kāraṇa liṅgam |
aṣṭa daridra vināśaka liṅgam   tat praṇamāmi sadāśiva liṅgam || 7||

सुरगुरु सुरवर पूजित लिङ्गम् सुरवन पुष्प सदार्चित लिङ्गम् ।

परात्परं परमात्मक लिङ्गम्  तत् प्रणमामि सदाशिव लिङ्गम् ॥ ८ ॥

suraguru suravara pūjita liṅgam   suravana puṣpa sadārcita liṅgam |
parātparaṁ paramātmaka liṅgam    tat praṇamāmi sadāśiva liṅgam || 8||

लिङ्गाष्टकम् इदं पुण्यं यः पठेत् शिव सन्निधौ ।

शिव लोकम् अवाप्नोति शिवेन सह मोदते ॥

liṅgāṣṭakam  idaṁ  puṇyaṁ  yaḥ  paṭhet  śiva sannidhau |
śiva  lokam  avāpnoti  śivena  saha  modate ||